# Shri VarahI Devi Stavam

# શ્રીવારાહીદેવિસ્તવમ્

## Document Information

Text title : Varahi Stavam

File name : vArAhIstavam.itx

Category : devii, devI, otherforms

Location : doc_devii

Latest update : August 22, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# શ્રીવારાહીદેવિસ્તવમ્

ધ્યાનમ્ -

ઐઙ્કાર દ્વયમધ્યસંસ્થિત લસદ્ભૂબીજવર્ણાત્મિકામ્ ।
દુષ્ટારાતિજનાક્ષિ વક્ત્રકરપત્સમ્ભિનીં જૃમ્ભિણીમ્ ॥

લોકાન્ મોહયન્તીં દૃશા ચ મહાસાદંષ્ટ્રાકરાલાકૃતિમ્ ।
વાર્તાલીં પ્રણતોઽસ્મિ સન્તતમહં ઘોણિંરથોપસ્થિતામ્ ॥

શ્રીકિરિ રથમધ્યસ્થાં પોત્રિમુખીં ચિદ્ઘનૈકસદ્રૂપામ્ ।
હલમુસલાયુધહસ્તાં નૌમિ શ્રીદણ્ડનાયિકામમ્બામ્ ॥ ૧॥

વાગ્ભવભૂવાગીશી બીજત્રયઠાર્ણવૈશ્ચ સંયુક્તામ્ ।
કવચાસ્ત્રાનલજાયા યતરૂપાં નૈમિ શુદ્ધવારાહીમ્ ॥ ૨॥

સ્વપ્નફલબોધયિત્રીં સ્વપ્નેશીં સર્વદુઃખવિનિહન્ત્રીમ્ ।
નતજન શુભકારિણીં શ્રીકિરિવદનાં નૌમિ સચ્ચિદાનન્દામ્ ॥ ૩॥

પઞ્ચદશવર્ણવિહિતાં પઞ્ચમ્યમ્બાં સદા કૃપાલમ્બામ્ ।
અઞ્ચિતમણિમયભૂષાં ચિન્તિતફલદાં નમામિ વારાહીમ્ ॥ ૪॥

વિઘ્નાપન્નિર્મૂલન વિઘેશીં સર્વદુઃખવિનિહન્ત્રીમ્ ।
સકલજગત્સંસ્તમ્ભનચતુરાં શ્રીસ્તમ્ભિનીં કલયે ॥ ૫॥

દશવર્ણરૂપમનુવર વિશદાં તુરગાધિરાજસંરૂઢામ્ ।
શુભદાં દિવ્યજગત્રયવાસિનીં સુખદાયિનીં સદા કલયે ॥ ૬॥

ઉદ્ધત્રીક્ષ્માં જલનિદિ મગ્નાં દંષ્ટ્રાગ્રલગ્નભૂગોલામ્ ।
ભક્તનતિમોદમાનાં ઉન્મત્તાકાર ભૈરવીં વન્દે ॥ ૭॥

સપ્તદશાક્ષરરૂપાં સપ્તોદધિપીઠમધ્યગાં દિવ્યામ્ ।
ભક્તાર્તિનાશનિપુણાં ભવભયવિધ્વંસિનીં પરાં વન્દે ॥ ૮॥

નીલતુરગાધિરૂઢાં નીલાઞ્ચિત વસ્ત્રભૂષણોપેતામ્ ।

નીલાભાં સર્વતિરસ્કરિણીં સમ્ભાવયે મહામાયામ્ ॥ ૯॥

સલસઙ્ખ્યમન્ત્રરૂપાં વિલસદ્ભૂષાં વિચિત્રવસ્ત્રાઢ્યામ્ ।
સુલલિતતન્વીં નીલાં કલયે પશુવર્ગ મોહિનીં દેવીમ્ ॥ ૧૦॥

વૈરિકૃતસકલભીકર કૃત્યાવિધ્વંસિનીં કરાલાસ્યામ્ ।
શત્રુગણભીમરૂપાં ધ્યાયે ત્વાં શ્રીકિરાતવારાહીમ્ ॥ ૧૧॥

ચત્વારિંશદ્વર્ણકમનુરૂપાં સૂર્યકોટિસઙ્કાશામી ।
દેવીં સિંહતુરઙ્ગા વિવિધાયુધ ધારિણીં કિટીં નૌમિ ॥ ૧૨॥

ધૂમાકારવિકારાં ધૂમાનલસન્નિભાં સદા મત્તામ્ ।
પરિપન્થિયૂથહન્ત્રીં વન્દે નિત્યં ચ ધૂમ્રવારાહીમ્ ॥ ૧૩॥

વર્ણચતુર્વિંશતિકા મન્ત્રેશીં સમદમહિષપૃષ્ઠસ્થામ્ ।
ઉગ્રાં વિનીલદેહાં ધ્યાયે કિરિવક્ત્ર દેવતાં નિત્યામ્ ॥ ૧૪॥

બિન્દુગણતાત્મકોણાં ગજદલાવૃત્તત્રયાત્મિકાં દિવ્યામ્ ।
સદનત્રયસંશોભિત ચક્રસ્થાં નૌમિ સિદ્ધવારાહીમ્ ॥ ૧૫॥

વારાહી સ્તોરતમેતદ્યઃ પ્રપઠેદ્ભક્તિસંયુતઃ ।
સ વે પ્રાપ્નોતિ સતતં સર્વસૌખ્યાસ્પદં પદમ્ ॥ ૧૬॥

ઇતિ શ્રીવારાહીદેવિસ્તવં સમ્પૂર્ણમ્ ।

*Shri VarahI Devi Stavam*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*